# वैशेषिकदर्शने द्रव्यादितत्त्वज्ञानमुत धर्मो निःश्रेयसहेतुः


## केशवशरणोऽर्यालः (विद्यावारिधिः)

*सहप्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयः, वाल्मीकिविद्यापीठम्*

keshavsharanaryal88@gmail.com

Orcid : https://orcid.org/0009-0003-1669-5580


https://doi.org/10.3126/anveshana.v4i1.96916


### लेखसारः

*प्रस्तुते शोधनिबन्धे वैशेषिकदर्शनाभिमतस्य निःश्रेयसस्य कारणविषयको विचारः प्रस्तुतो विद्यते। वैशेषिकदर्शनमाधारीकृत्य नैकविधेषु विषयेषु जातेऽपि चिन्तने तत्प्रतिपादितनिःश्रेयसस्य मूलं कारणं किम् ? कथञ्चेत्यत्र सूत्रभाष्यकृतौ तद्व्याख्यातॄँश्चानुसृत्य न तथा विवेचनं लभ्यते, यथापेक्ष्यते। तदेव शोधरिक्तता खल्विह विषये। प्रसङ्गेऽत्र वैशेषिकदर्शनप्रतिपादितनिःश्रेयसस्य किं कारणम् ? कीदृशश्च तत्र व्याख्यातॄणां मतभेदः ? इति समस्यात्वेन दृग्गोचरीभवति। एनां समस्यां समाधातुं वैशेषिकदृष्टिं पुरस्कृत्य निःश्रेयसकारणविवेचनमेव प्रस्तुतस्य शोधनिबन्धस्य मुख्यमुद्देश्यमस्ति। प्रस्तुतस्य शोधकार्यस्य कृते सामग्रीसङ्कलनार्थं विशेषतो बहुशश्च पुस्तकालयाः प्रयुक्ताः, विश्लेषणाय च मूलतः समीक्षणात्मको विधिरवलम्बितो वर्तते। एतावता चात्र प्रयुक्तः शोधविधिर्गुणात्मको विद्यते। सैद्धान्तिकाधारश्च वैशेषिकशास्त्रगर्भितो निःश्रेयससम्बद्धसिद्धान्तः। वैशेषिकदर्शनप्रवर्द्धको मुनिः कणादस्तावद् धर्मविशेषप्रसूतात् तत्त्वज्ञानान्मुक्तिरिति व्याचष्टे। कोऽयं धर्मः ? किंस्वरूपकश्च सः ? इत्यत्र कणव्रतोऽभ्युदयनिःश्रेयसहेतुरिति बभाषे। तावता तत्त्वज्ञानं धर्मो वा निःश्रेयसकारणम् ? इति विचिकित्सा समजनि। तत्समाधाने वैशेषिकशास्त्रविचक्षणानां नैकमतं लभ्यते। तदत्रालेखे विमृष्टम्। कतिपयेषां मूर्ध्न्यभिषिक्तानां वैशेषिकदर्शनव्याख्यातॄणां मते ज्ञानकर्मैतदुभयमपि निःश्रेयसकारणत्वेन सदपि केचन व्याख्यातारो धर्मस्य कारणत्वम्, केचन तु तत्त्वज्ञानस्य कारणत्वं विवेचयन्तः सन्तो यथायथं तत्तत्प्रामुख्यं प्रतिपादयन्तः स्वनिष्ठं ज्ञानकर्मसमुच्चयवादित्वं पुरःस्थापयन्तीति निष्कर्षोऽत्र स्थापितः।*


**शब्दकुञ्जी :** कणादः, धर्मव्याख्यानम्, तत्त्वज्ञानान्मुक्तिः, विचिकित्सा, ज्ञानकर्म्मसमुच्चयवादी।

### विषयपरिचयः

पौरस्त्यचिन्तने पुरुषार्थचतुष्टयं प्रथितं विद्यते। पुरुषार्थचतुष्टयपदघटकेन पुरुषपदेन नार्या अर्थो नास्ति अथ च पुरुषस्यैवेति भ्रमो मास्तु। यतो ह्यत्र पुरुषो नामाऽऽत्मविशेषस्तथा च स्त्रीणां पुंसाञ्चाविरोध इति ज्ञेयम्। तावतास्माकं समेषां जीवानां धर्मार्थकाममोक्षरूपाणां चतुर्विधपदार्थानां पुरुषार्थत्वमतिरोहितम्। तथापि विशेषतोऽखिलस्यापि

कार्यजातस्य मनुतनयैरेव विवेकपुरस्सरं सम्पाद्यमानत्वात् पुरुषार्थचतुचष्टयं विशिष्य मानवस्यैवेति स्फुटीभवति। सर्वोऽपि प्राणी सुखमिच्छतीत्यत्र नास्ति काचिद् विप्रतिपत्तिः। तत्रापि मानवः खलु विवेकपुरस्सरं सुखमिच्छति चेत्तदितरे प्राणिनो विवेकमन्तरेति वस्तुतत्त्वम्। तत्र मानवाभीष्टं मूलभूतं सुखन्तावन्न सामान्यमपितु निरतिशयम्। यच्च पौरस्त्यचिन्तने मुक्तिकैवल्यनिर्वाणादिपदैर्व्यवह्रियते। तथा सत्यपि न्यायवैशेषिकदर्शनयोः प्राधान्येन निःश्रेयसपदस्य व्यवह्रियमाणत्वादत्रापि शोधनिबन्धे निःश्रेयसपदमेव व्यवहारपथे आनीतम्। किञ्च परमर्षिणा गौतमेनाथ च महर्षिणा कणादेन यथायथं प्रमाणादिपदार्थानां द्रव्यादिपदार्थानाञ्च तत्त्वज्ञानान्निःश्रेयसमित्युक्तत्वाच्चात्र शोधलेखे निःश्रेयसपदमेव चितम्। तत्रोपर्युक्तेषु चतुर्विधेषु पुरुषार्थेषु निःश्रेयसस्यैव प्रामुख्यमिति वयं जानीम एव। 'तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते' (४।२२।३५) इति भागवतीयवचनाच्च तत् पुष्यति। तथाभिधानेन निःश्रेयसेतराणि धर्मार्थकामरूपाणि पुरुषार्थजातानि निःश्रेयसार्थानीत्यप्यभ्युपगमसिद्धान्तसिद्धं भवति। एतदेवाऽऽदाय सर्वाण्यपि पौरस्त्यचिन्तनानि निःश्रेयसार्थमेव पर्यवसन्नानि भवन्तीति वक्तुं सुशकम्। अखिलान्यपि चिन्तनानि मोक्षार्थमेव प्रवर्तमानानि सन्ति राराजन्ते इत्यत्र नास्ति काचित् संशीतिः। पौरस्त्यचिन्तनेषु तत्र तत्र मोक्षकारणे तत्स्वरूपे च भेदस्तु सहजोऽपेक्ष्यश्च। प्रकृतशोधलेखे वैशेषिकचिन्तनमादाय निःश्रेयसकारणविषयको विचारः प्रस्तूयते। प्रसङ्गेऽत्र मूलतस्तत्त्वज्ञानवैराग्यसम्पन्नस्य श्रीमत्कणादमुनिजृम्भितं द्वितीयं तृतीयञ्च सूत्रमादाय तद् विचार्यते। ततः प्राक् सूत्रद्वयघटितो निःश्रेयसपदार्थो धर्मपदार्थश्च व्याक्रियेते। तत्राऽऽदौ समस्याकथनादिकं वितन्यते।

## समस्याकथनम्

यद्यपि सामान्यतो वैशेषिकदर्शनदृष्ट्या निःश्रेयसविषयकं समीक्षणं बहुशो बहुभिर्विचक्षणैर्विहितं लभ्यते, अथापि निःश्रेयसकारणविषयकं चिन्तनं तत्तदाचार्याणां मतभेदविषयकं समीक्षणं वस्तुगत्या तत्तात्पर्यञ्च नानुशीलितं लभ्यते। अतः प्रकृतप्रसङ्गे वैशेषिकदर्शनाभिमतनिःश्रेयसकारणं किम् ? इत्येव मूलभूता समस्या वर्तते।

## उद्देश्यकथनम्

वैशेषिकदर्शनं पुरस्कृत्य तदभिमतनिःश्रेयसकारणमादाय समीक्षणं वस्तुतत्त्वविवेचनञ्च विधाय तत्तात्पर्यप्रकाशनपूर्वकं निष्कर्षणमेव प्रस्तुतस्य शोधलेखस्योद्देश्यं वर्तते।

## पूर्वकार्यसमीक्षणम्

पौरस्त्यचिन्तने वैशेषिकदर्शनं विशिष्टं स्थानमावहते। प्रायः सर्वस्यापि पौरस्त्यचिन्तनस्य मोक्षे पर्यवसनाद् वैशेषिकेऽपि तत् स्वाभाविकम्। वैशेषिकदर्शनं पुरस्कृत्य निःश्रेयसविषयकं चिन्तनं तत्र तत्र ग्रन्थेषु कृतं लभ्यत एव। तथा सत्यपि निःश्रेयसकारणमादाय तत्तन्मतानामाकरमन्विष्य च न तथा विमृष्टिर्लभ्यते यथाऽपेक्ष्यते। न जातेऽपि पृथक्त्वेन समग्रतयाऽऽकरस्थप्रसङ्गमन्विष्य निःश्रेयसकारणविषयके विमर्शने, तद्विषयकं चिन्तनं किञ्चन लभ्यत एव। तदेवात्र प्रतिनिधित्वेन किञ्चन प्रस्तूयते— आनन्दझामहोदयेन *पदार्थशास्त्र* (ख्रै.१९६५) इत्याख्ये ग्रन्थे

वैशेषिकदर्शनसम्बद्धं निःश्रेयसतत्त्वं विश्लिष्य तत्कारणविषयकं चिन्तनमपि जृम्भितमेव। तत्क्रमे तत्रभवता झामहाभागेन निःश्रेयसार्थं तत्त्वज्ञानमपेक्षितमिति प्रतिपादितं विद्यते। तथा सत्यपि ग्रन्थकृता प्राक्तनानामर्वाक्तनानाञ्च व्याख्यातॄणां मतभेदविषयकं चिन्तनमान्तं प्रस्तुतं नास्ति। नारायणमिश्रमहोदयेन *वैशेषिकदर्शन : एक अध्ययन* (ख्रै.१९६८) इत्याख्ये वैशेषिकदर्शनविश्लेषणात्मके ग्रन्थे वैशेषिकदर्शनाभिमते मोक्षविषये तत्कारणविषये च किञ्चन विश्लेषणं प्रस्तुतं लभ्यते। तत्क्रमे तत्रभवता मिश्रमहोदयेन वैशेषिकचिन्तने द्रव्यादीनां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञाने जाते सति मुक्तिर्लभ्यत इति व्याकृमस्ति। तथा सत्यप्याचार्याणां मतभेदमादाय ऐतिहासिकी दृष्टिः पुरःस्थापिता नास्ति। काशिकानन्दगिरिमहाभागेन *द्वादशदर्शनसङ्ग्रहः* (ख्रै.१९८८) इत्याख्ये ग्रन्थे वैशेषिकदर्शनदृष्ट्या मोक्षविषयकं सामान्यविवेचनं कृतं लभ्यते। तत्र निःश्रेयसविषयके चिन्तने प्रस्तुतेऽपि तत्कारणमादाय सम्यग् विश्लेषणं कृत्वा न निष्कर्षणं प्रस्तुतं लभ्यते। डा.किशोरदासशास्त्रिमहाभागेन *भारतीय दर्शन और मुक्ति–मीमांसा* (वै.२०५५) इत्याख्ये ग्रन्थेऽखिलमपि पौरस्त्यचिन्तनमादाय मुक्तिर्व्यालोडिता। तत्क्रमे तत्रभवता शास्त्रिमहाभागेन वैशेषिकसिद्धान्तं पुरस्कृत्य निःश्रेयसविषयकं विश्लेषणं कृतं लभ्यत एव। तथापि तत्कारणविषये आन्तं समीक्षणं कृतं नास्ति।

एतावता नैकविधैर्विद्वद्भिर्व्याख्यातृभिश्च साक्षात् परम्परया वा वैशेषिकदर्शनाऽभिमतनिःश्रेयसं तत्कारणञ्च किञ्चन व्यालोडितमेव लभ्यते। तथा सत्यपि वैशेषिकदर्शनसम्मतनिःश्रेयसकारणे केन्द्रीभूयाऽऽचार्याणां मतभेदविषयकमान्तं चिन्तनं विहितं न लभ्यतेऽतस्तद्व्यालोडनमनुसन्धानदृशाऽपर्याप्तत्वं निर्बलत्वञ्चेति स्फुटं ज्ञायते। तदेव खलु तावत् प्रकृतविषये शोधरिक्तता। तां शोधरिक्ततामपनीय प्रस्तुते शोधलेखे वैशेषिकदर्शनगतं विचारमादृत्य निःश्रेयसकारणविषयिणी मीमांसा प्रस्तुता वर्तते।

प्रस्तुते लघुनिबन्धे वैशेषिकदर्शनदृष्टिं पुरस्कृत्य निःश्रेयसकारणविषयकः समीक्षणात्मको विमर्शो विहितो वर्तते। अतश्च वैशेषिकदर्शनपुरस्सरं निःश्रेयसतत्त्वकारणमादायाऽध्ययनायाऽध्यापनायऽग्रेऽनुसन्धानाय च प्रस्तुतस्य शोधलेखस्य साहाय्यं भजमानत्वादस्यौचित्यं पुष्यतीत्यत्र नास्ति काचिद् विप्रतिपत्तिः।

## शोधविधिः

प्रस्तुतमिमं लघुप्रबन्धं सम्पादयितुमत्र सामग्रीसङ्कलनविधिरध्ययनविश्लेषणविधिश्चेति शोधविधिर्द्विधा विभक्तः। तत्र सम्पादितस्य लघुप्रबन्धस्य कृत आवश्यकसामग्रीणां सङ्कलनार्थं भूरिशः पुस्तकालयाः प्रयुक्ताः। तत्र पुस्तकालयेषु प्राप्ता ग्रन्था एव प्रमुखसामग्रीत्वेन गृहीताः सन्ति। एवमेव यथावश्यकं वैशेषिकचिन्तनविचक्षणैः सह संवादादिकमपि विधाय सामग्रीसङ्कलनं कृतमस्ति। एवमेव प्रस्तुते लघुनिबन्धे मूलतः समीक्षणात्मको विधिरवलम्बितो वर्तते। अस्मिँश्च निबन्धे शास्त्रनिर्दिष्टान् सिद्धान्ताँश्चाऽऽदाय तत्तद्विषयाणां विश्लेष्यत्वान्निगमनात्मकविधिरवलम्बित इति सुतरां सिद्ध्यति। अभिधानेनाऽनेन लघुप्रबन्धेऽत्र गुणात्मकविधिरवलम्बित इत्यपि सिद्ध्यति। वैशेषिकदर्शनप्रतिपादितनिःश्रेयसहेतुविमर्शनमेव प्रस्तुतस्य शोधलेखस्य क्षेत्रं सीमा च वर्तते।

## विषयविश्लेषणम्

**निःश्रेयसपदार्थः**

नितरां श्रेयः = निःश्रेयसमिति विग्रहबलान्निःश्रेयसपदेन परमकल्याणमगवम्यते। एतत्पर्यायत्वेन मुक्तिकैवल्यनिर्वाणादीनि पदानि व्यवह्रियन्ते—

**मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्।**

**मोक्षोऽपवर्गः ...** ॥ (अमरसिंहः, वै.२०७७, १।५।६,७)

'(इदमनयोः) अतिशयेन प्रशस्यम्' इति विग्रहे "द्विवचनविभज्योपपदे तरबीयसुनौ" (पाणिनिः, अष्टा. ५।३।५७) इत्यनेन सूत्रेण श्रेष्ठार्थे प्रशस्यशब्दत ईयसुन्प्रत्ययो जायते। ततः "प्रशस्यस्य श्रः" (पाणिनिः, अष्टा. ५।३।६०) इत्याख्येन सूत्रेण प्रशस्यस्य स्थाने श्रादेशे श्र±ईयसुन् इति स्थिते ईयसुन्प्रत्ययस्य नकारस्योकारस्य चानुबन्धलोपे 'श्र+ईयस्' इति जाते गुणे श्रेयस् जायते। ततो 'नितरां श्रेयः' इत्यर्थे "अचतुर–विचतुर–सुचतुर–स्त्रीपुंस–धेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीव–पदष्ठीव–नक्तन्दिवरात्रिन्दिवाहर्दिवसरजस–निःश्रेयस–पुरुषायुष–द्व्यायुत्र्यायुषर्ग्यजुष–जातोक्ष–महोक्ष–वृद्धोक्षोपशुनगोष्ठश्वाः" (पाणिनिः, अष्टा. ५।४।७७) इत्यनेन सूत्रेण निःश्रेयसशब्दो निपात्यते। तावता च निःश्रेयसपदेन नितरां श्रेयः परमकल्याणं वेति ज्ञायते। ननु व्याकरणशास्त्रे "अजादी गुणवचनादेव" (पाणिनिः अष्टा. ५।३) इति नियमाद् अजादिप्रत्ययः गुणवाचिशब्दत एव जायते। ईयसुन् प्रत्ययोऽपि अजादिरेव। परमुपर्युक्तनियमानुसारेण प्रशस्यशब्दस्यागुणवाचित्वादीयसुन् प्रत्ययो न स्यात्, तथा सति निःश्रेयसपदं न निष्पद्येतेति चेत्, सत्यम्, परं प्रशस्यशब्दतोऽजादिप्रत्ययेऽसति सूत्रस्य वैयर्थ्यापत्तेरगुणवाचित्वेऽपि प्रशस्यशब्दत ईयसुन् प्रत्ययो जायते। फलतो निःश्रेयसपदं सुतरां निष्पद्यत इति विवेकः।

**धर्मपदार्थः**

मुनिः कणादस्तावद् धर्मविशेषप्रसूतात् तत्त्वज्ञानान्मुक्तिरिति व्याचष्टे— "धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" (कणादः, वै.सू. १।१।४)। अत्र सूत्रस्यादौ धर्मविशेषप्रसूताद् इति पदं विद्यते। तथा च धर्मविशेषप्रसूतात् तत्त्वज्ञानान्मुक्तिरिति ज्ञायते। अतः कोऽयं धर्मः ? इति विचिकित्सा स्वाभाविकी। किञ्चात्र किमर्थं धर्मविशेषप्रसूताद् इति पदमुपात्तं न तु धर्मप्रसूताद् इति पदम् इत्यपि जिज्ञासा वरीवर्ति। तत्र कोऽयं धर्मः ? किंलक्षणश्चेति जिज्ञासायां प्रथमतो धर्मतत्त्वं परिचाययन् कणभुङ्गनिराह— "यतोऽभ्युदयनिःश्रेयससिद्धिः सः धर्मः" (कणादः, वै.सू. १।१।२)। तथा च यतोऽभ्युदयसिद्धिर्यतश्च निःश्रेयससिद्धिस्तदुभयं धर्म्मः। एतावता धर्मस्तावदभ्युदयनिःश्रेयसयोः कारणमिति जानीमः। परन्त्वत्रापि पुनर्जिज्ञास्यते यत् तथा धर्मः किंस्वरूपकः ? एतन्नाम यतोऽभ्युदयो यतश्च निःश्रेयसं जायते स धर्म इति ज्ञातम्। परं कुतः किंवा किंस्वरूपकात् तत्त्वात् तज्जायते, यच्च तत्त्वं धर्मपदेन व्यपदिश्येत ? इति। एतत्समाधानं प्राक् सूत्रघटकेनाभ्युदयपदेन

किमधिगम्यते ? अथ च निःश्रेयसपदेन च किं ज्ञायते ? इति विचारयामः। अमुष्य सूत्रस्य व्याख्यानक्रमे मिथिलावृत्तावभ्य,दयो नाम स्वर्गादिसुखं निःश्रेयसञ्च मुक्तिरिति व्याकृतं विद्यते— "अभ्युदयः स्वर्गादिसुखम्। निःश्रेयसं मुक्तिः" (कणादः, वै.सू. १।१।२)। यत एतयोः सिद्धिर्जायते स एव धर्मः— "तयोः सिद्धिः उत्पत्तिर्यतः" (पृ.२)। वैशेषिकसूत्रोपस्कारश्चाभ्य,दयस्तत्त्वज्ञानं निःश्रेयसमात्यन्तिकी दुःखनिवृत्तिरित्याचष्टे— "अभ्युदयस्तत्त्वज्ञानं निःश्रेयसमात्यन्तिकी दुःखनिवृत्तिः" (मिश्रः, वै.२०६४, पृ.११)। तत्रभवान् शङ्करमिश्रः पुनरग्रे आह– "तदुभयं यतः स धर्म्मः" (पृ.११)। धर्मश्चासौ प्रवृत्त्यात्मकनिवृत्त्यात्मकभेदेन द्विविधो भवति। तावता च प्रवृत्त्यात्मकधर्मस्य जनकं निवृत्त्यात्मकधर्मस्य जनकमिति कृत्वा कर्मणोऽपि द्वैविध्यमेव। कर्म नाम वेदनिर्दिष्टो यज्ञ एव। तथा कर्मैव मीमांसायां धर्मपदेन बोध्यते। धर्मं व्याकुर्वन् मीमांसायां सूत्रकृत् "चोदनालक्षणोऽर्थो धर्मः" (जैमिनिः, मी.सू. १।१।२) इत्यसूत्रयत्। तच्च सूत्रं व्याख्यायन्नर्थसङ्ग्रहकृद् "यागादिरेव धर्मः। तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः" (लौगाक्षिभास्करः, ख्रै. २००३, पृ.६) इति प्रोवाच। एतावता च वेदनिर्दिष्टं यागादिकर्मैव धर्मपदेन ज्ञेयम्। परमत्र प्रसङ्गे तावद् धर्मपदेन तथा धर्मजन्यः प्रवृत्त्यात्मको निवृत्त्यामकश्च गुणविशेषो ग्रहीतुं शक्यः, तदेव ज्यायानिति प्रतीमहि। आद्यन्तावदस्मान् जगति प्रवर्तयति चेदन्त्यञ्च निवर्तयति। प्रवृत्त्या किंवा प्रवृत्त्यात्मककर्मणा ऐहलौकिकं सुखं स्वर्गादिसुखञ्चोपभुज्यते चेन्निवृत्त्यात्मककर्मणाऽऽत्मबोधपुरस्सरमात्यन्तिकी दुःखनिवृत्तिर्जायते, यच्च निःश्रेयसपदेन व्यवह्रियते। अधस्तनैर्मानववचनैस्तदेव ज्ञाप्यते—

**सुखाऽऽभ्युदयिकं चैव नैःश्रेयसिकमेव च।**

**प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म वैदिकम्॥**

**इह चाऽमुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते।**

**निष्कामं ज्ञानपूर्वन्तु निवृत्तमुपदिश्यते॥**

**प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम्।**

**निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै॥** (मनुः, १२।८८–९०)

अत्र तावत् स्पष्टरवेणैहलौकिकं सुखमथ च स्वर्गीयं सुखं यतो लभ्यते, तत् प्रवृत्त्यात्मकं कर्म किंवा धर्मः, एवमेव यतः पारलौकिकं सुखं किंवा मुक्तिरधिगम्यते तन्निवृत्त्यात्मकं कर्म किंवा धर्म इति ज्ञापितं विद्यते। तदुभयमपि कर्म किंवा धर्मः कणभुजा केवलमेकेनैव धर्मपदेनोद्दिष्टमिति बुध्यामहे— "यतोऽभ्युदयनिःश्रेयससिद्धिः सः धर्मः" (कणादः, वै.सू. १।१।२)। ततस्तत्रभवता मुनिना धर्मविशेषप्रसूतात् तत्त्वज्ञानान्निःश्रेयसं लभ्यत इति ज्ञापितं खलु। तत्र विशेषपदेन निवृत्त्यात्मको धर्मो द्योत्यते। धर्मविशेषपदेन तथा निवृत्त्यात्मकधर्मज्ञानाय का राजाज्ञा ? इति चेद् विशेषपदवैयर्थ्यात् किञ्च निवृत्त्यात्मकधर्मत एव तत्त्वज्ञानादिति ज्ञायताम्। तत्र च प्रमाणत्वेन लसन्त्यमूनि प्रशस्तपादश्रीधरोदयनशङ्करमिश्रजृम्भितानि वचनरचनानि— "... निवृत्तिलक्षणः केवलो धर्मः परमार्थदर्शनजं सुखं

कृत्वा निवर्त्तते" (प्रशस्तपादः, ख्रै.१९९७, पृ.६८२) "... आत्मज्ञानम् अभ्यस्यतः प्रकृष्टनिवर्तकधर्मोपचये सति" (भट्टः, ख्रै.१९९७, पृ.१९) "... दीर्घकालादरनैरन्तर्यसेवितान्निवृत्तिलक्षणाद् धर्म्मादेव तत्त्वज्ञानमुत्पद्यते, यतोऽपवृज्यते" (उदयनः, ख्रै.१९८०, पृ.९९) ".... तच्च निवृत्तिलक्षणाद्धर्मादेतेषामनायासेन सेत्स्यतीति ... स च धर्मो निवृत्तिलक्षणो वक्ष्यते ...ननु निवृत्तिलक्षणो धर्मस्तत्त्वज्ञानद्वारा निःश्रेयसहेतुः ..." (मिश्रः, वै.२०६४, पृ.५,११,१३)।

एतावता प्रवृत्त्यात्मककर्मतोऽभ्युदयो जायते चेन्निवृत्त्यात्मककर्म्मतो निःश्रेयसमधिगम्यते। कर्म चैतदात्मबोधपुरस्सरं निःश्रेयसं जनयति। तज्ज्ञापनार्थमेव विशेषदलमुपात्तमित्येव तद्गतस्वारस्यम्।

**वैशेषिकदर्शने धर्मस्य व्याख्यानमुत द्रव्यादिपदार्थानाम् ?**

वैशेषिकदर्शनप्रणेता मुनिः कणादस्तावद् ग्रन्थारम्भ एव "अथातो धर्मं व्याख्यास्यामः" (कणादः, वै.सू. १।१।१) इत्यभिदधानो धर्मव्याख्यानं प्रतिजानीते। ततः कोऽयं धर्मः ? इति विचिकित्सायां यतोऽभ्युदयनिःश्रेयससिद्धिरित्येतदुपस्थापयति। तदनु 'द्रव्यादिपदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्' इत्यभिधाय द्रव्यादिपदार्थानाम् उद्देशलक्षणपरीक्षापुरस्सरं तद्व्याख्यानमारभते। अत्र खलु कैश्चित् प्रतिवादिभिरयमाक्षेपः पुरःस्थाप्यते यद् धर्मव्याख्यानं प्रतिज्ञाय द्रव्यादिव्याख्यानं विरुद्धम्। विरुद्धं पन्थानमवलम्बमानस्य मुनेरप्रामाण्यात् तच्छास्त्राप्रामाण्यापत्तिरिति। प्रसङ्गोऽयं न्यायकन्दल्या भूमिकायां तत्सम्पादकेन पण्डितश्रीदुर्गादत्तमहोदयेनोल्लिखितो विद्यते। तत्रभवता तत्र कारिकेयमुद्धृता वर्तते—

**धर्मं व्याख्यातुकामस्य षट्पदार्थोपवर्णनम्।**

**सागरं गन्तुकामस्य हिमवद्गमनं यथा॥** (झा, ख्रै.१९९७, पृ.५२– भूमिका)

एतत् समादधानो वैशेषिकसूत्रोपस्कारकृद् 'वस्तुतस्तु ज्ञानवैराग्यसम्पन्नो मुनिः कणादो मुक्त्यर्थं षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानमेव मूलं कारणमिति मनुते। तत्त्वज्ञानस्य पुनर्निवृत्त्यात्मकधर्मप्रसूतत्वात्तदेवादौ उपदिशामि तदनूद्देशलक्षणपरीक्षापुरस्सरं षट् पदार्थान् उपदेक्ष्यामीति मनसि निधायादौ धर्मतत्त्वं व्याकरोति, अतो न विरोधापत्तिः' इत्याचष्टे—

**अथ कणादो मुनिस्तत्त्वज्ञानवैराग्यसम्पन्नः षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानमेवात्मतत्त्वसाक्षात्कारप्राप्तये परमः पन्था इति मनसि कृत्वा तच्च निवृत्तिलक्षणाद्धर्मादेतेषामनायासेन सेत्स्यतीति लक्षणतः स्वरूपतश्च धर्ममेव प्रथममुपदिशाम्यनन्तरं षडपि पदार्थानुद्देशलक्षणपरीक्षाभिरूपदेक्ष्यामीति हृदि निधाय तेषामवधानाय प्रतिजानीते** (मिश्रः, वै.२०६४, पृ.५)।

वस्तुतस्तु कणादो निवृत्तिलक्षणाद् धर्मादेव तत्त्वज्ञानं जायत इति भाषते। अतस्तेन निवृत्त्यात्मको धर्म एव लक्षितव्योऽथापि अर्द्धजरतीयन्यायो मास्तु, अस्तु च तत्त्वजिज्ञासोः प्रवृत्तकर्मबोधोऽपीति विचार्य प्रवृत्त्यात्मकधर्मोऽपि

परिचायितः। किञ्चात्र तु जगत्यां प्रवृत्त्यात्मकधर्म एव प्रवर्तते खलु, अतः सोऽपि न हेय इत्यपि तत्रभवतः कणभुजो हृदि निहितं प्रतीयते। एतावता वस्तुतो वेदनिर्दिष्टकर्मानुष्ठेयम्, तदेवात्मतत्त्वज्ञानद्वारेण मोक्षं जनयतीत्येव कणादहृदयमित्यवगन्तुं सुशकम्। यच्च शङ्करपादैरप्यवलम्ब्य "वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयताम्" (शङ्कराचार्यः, ... ?, पृ.) इत्यवादि। कणादप्रभृतिमहर्षीणां शङ्करपादादिभिरवलम्बनं सहजमेव। निष्कृष्टौ तावद् वेदप्रतिपादितो धर्मः किंवा वेदनिर्दिष्टं कर्मैवाऽऽत्मबोधपुरस्सरं मुक्तिं जनयतीति कणभक्षस्य परमः पन्थाः। ननु तर्हि वैशेषिकशास्त्रे वेदनिर्दिष्टं कर्मैव व्याख्यायतां द्रव्यादिपदार्थविवेचनं माऽऽश्रीयताम्। किमर्थं द्रव्यादिपदार्थविवेचनाऽऽश्रयणमिति चेत् सत्यम्, परमापामरजनस्य यदा यावज्जागतिकपदार्थस्वरूपगतं वास्तवं ज्ञानं नोत्पद्येत, तदा यावन्मिथ्याज्ञानमापद्येत। तज्ज्ञानमेव मुक्तिबाधकम्, अतो मिथ्याज्ञाने सति मुक्तिरसम्भवेति काणादरहस्यम्। तदेव हृदि निधाय जगद्दुःखपङ्कनिमग्नमापामरजनमुद्दिधीर्षुः परमकारुणिको महामुनिः कणव्रतो वेदनिर्दिष्टधर्मव्याख्यानं मीमांसादिकृत्यमिति च सुचिन्त्यऽऽस्माकीनोऽनात्मन्यात्मबोधो मास्त्वित्येतदर्थं धर्मव्याख्यानमहत्त्वनिदर्शनपूर्वकं द्रव्यादिपदार्थज्ञानपुरस्सरमात्मबोधस्यैव मुक्तेः कारणत्वमभिधाय द्रव्यादिपदार्थानां वस्तुगतिज्ञापनार्थं तद्व्याख्यानमारभत इत्येवानाविष्कृतं निगूढं तत्त्वम्।

### वैशेषिकचिन्तने निःश्रेयसहेतुः

मुनिः कणादस्तावद् धर्मविशेषप्रसूतात् तत्त्वज्ञानान्मुक्तिरिति व्याचष्टे— "धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" (कणादः, वै.सू. १।१।४)। अमुष्य सूत्रस्यादौ धर्मविशेषप्रसूताद् इति पदं विद्यते। तथा च धर्मविशेषप्रसूतात् तत्त्वज्ञानान्मुक्तिरिति ज्ञायते। अतोऽत्र कोऽयं धर्मः ? इति विचिकित्सा भवत्येव। तत्र जिज्ञासायां प्रथमतो धर्मतत्त्वं परिचाययन् कणादश्चष्टे— "यतोऽभ्युदयनिःश्रेयससिद्धिः सः धर्मः" (कणादः, वै.सू. १।१।२) अर्थाद् यतोऽभ्युदयो निःश्रेयसञ्च जायते, स धर्म इति। एतावता धर्मस्तावदभ्युदयनिःश्रेयसयोः कारणमिति जानीमः। एतेनात्र द्वैधापत्तिः— एकञ्च तत्त्वज्ञानान्मुक्तिः, अन्यच्च धर्मान्मुक्तिरिति। अतो वस्तुतस्तत्त्वज्ञानान्मुक्तिरुत धर्मतः ? इति विचिकित्सा विरोधश्चापद्यते। एतदेव श्रीधराचार्येण न्यायकन्दल्याममुना वाक्यजातेन स्पष्टीकृतम्– "ननु यदि तत्त्वज्ञानं निःश्रेयसहेतुस्तर्हि धर्म्मो न कारणम् ? ततः सूत्रविरोधः" (भट्टः, ख्रै.१९९७, पृ.१८)। निरुक्तायां विचिकित्सायां किंवा विरोधे सूत्रकारो महर्षिः कणादो न किमपि सङ्केतितवान् न वा समाहितवान् लभ्यते। भाष्यकारः प्रशस्तदेवस्तु तत्समाधाने मार्गप्राशस्त्यमकार्षीदेव। स चाऽऽह— "तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेव" (प्रशस्तपादः, ख्रै.१९९७, पृ.१८)। तत् पदं खलु सार्वनामिकम्। सर्वनाम्नः पूर्वपरामर्शित्वमिति तु सर्ववेद्यम्। अत्रापि तत्पदं विद्यते। अतोऽस्माकं पुरतः प्रश्नोऽयं समुदेति यद् अत्रस्थेन तत्पदेन किमवगम्यते ? एतत्समाधाने नैकमतं दृग्गोचरीभवति वैशेषिकशास्त्रगतनिगूढतत्त्वप्रकाशयितॄणाम् ऋषिकल्पानामाचार्याणाम्। व्योमशिवाचार्यस्तावत् तत्पदेनाऽऽत्मज्ञानमभिप्रैति। स चाऽऽह— "तच्चात्मज्ञानम्" (व्योमशिवाचार्यः, ख्रै.१९८३, पृ.१५)। किरणावलीकृत्तत्त्वज्ञानमिति व्याख्याति— "तत्त्वज्ञानं ... निःश्रेयसहेतुः"

(उदयनः, ख्रै.१९८०, पृ.९९)। तदेवानुसरन् किरणावल्या रहस्यकारोऽपि तत्त्वज्ञानमित्येवाऽऽह– "तच्चेत्यस्य साक्षात्कारात्मकं तत्त्वज्ञानञ्चेत्यर्थ इति भावः" (मथुरानाथतर्कवागीशः, ख्रै.१९८१, पृ.१५)। एतावता नैकविधानां विदुषां मते ईश्वरचोदनाभिव्यक्ताद् धर्मात् तत्त्वज्ञानं जायते, ततो मुक्तिरिति फलितार्थः। परं न्यायकन्दलीकृत् श्रीधरस्तु स्पष्टतो धर्मत एव निःश्रेयसं सम्पद्यत इत्याख्याति— "तन्निःश्रेयसं धर्म्मादेव भवति" (भट्टः, ख्रै.१९९७, पृ.१८)।

किञ्चनैतद् व्याकुर्मः— व्योमशिवाचार्यस्य मते निःश्रेयसं तत्त्वज्ञानादेव जायते, तच्च तत्त्वज्ञानं वेदप्रतिपादिताद् धर्मान्निष्पद्यते। वैदिकधर्ममन्तरा किंवा वेदोपदिष्टकर्म विना तत्त्वज्ञानं न जायते, तेन विना न मुक्तिरिति– "... तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेवेति समुच्चीयमानावधारणमनिर्दिष्टप्रतिषेधार्थम्। ... यस्य विशिष्टधर्मसद्भावस्तस्याल्पीयसा प्रयासेन तत्त्वज्ञानं सम्पद्यते" (व्योमशिवाचार्यः, ख्रै.१९८३, पृ.१५)। अत्र विशिष्टधर्मो नाम निवृत्त्यात्मकं कर्म। एतावता व्योमशिवाचार्यो वेदोपदिष्टैर्नित्यनैमित्तिकादिभिर्निवृत्तकर्मभिर्ज्ञानं किंवाऽऽत्मज्ञानं पुष्टं जायते, तत एव मोक्षः सम्पद्यत इत्युद्घोषयति। तत्रापि विशेषतो निवृत्त्यात्मकधर्मतः। एतावताऽयं ज्ञानकर्मसमुच्चयवादी दृश्यते। वस्तुतस्तु स तु कर्मज्ञानसमुच्चयवादी खलु। तस्य मते ज्ञानस्यैव मोक्षकारणत्वेऽपि तत्परिपाकार्थं धर्मो ह्यनितरसाधारणकारणम्। धर्मं विना किंवा वेदोक्तं कर्म विना न तत् परिपाके आयाति न वा मोक्षं जनयति। एतज्ज्ञापनार्थमेव सूत्रकारः कणादो 'धर्मतो मोक्षो जायते' इत्यभ्यधात् किंवा 'यतो निःश्रेयसं जायते, स धर्मः' इत्युक्तवान् इत्येतत् तत्रभवान् प्रथमो व्याख्याता व्योमशिवाचार्यः समभिप्रैति।

न्यायकन्दलीकारः श्रीधरभट्टस्तु मोक्षस्तावद् धर्मत एवेति निगदति। तन्मते द्रव्यादितत्त्वज्ञानं धर्मस्य कारणत्वेन वरीवर्ति– "... तन्निःश्रेयसं धर्म्मादेव भवति, द्रव्यादितत्त्वज्ञानं तस्य कारणत्वेन निःश्रेयससाधनमित्यभिप्रायः" (भट्टः, ख्रै.१९९७, पृ.१८)। एतत् कथम् ? इति जिज्ञासां समादधानः कन्दलीकारो प्रमाणं दर्शयन्नाऽऽह— 'जागतिकेषु विषयेषु तत्त्वतो ज्ञातेषु तत्रस्थदोषज्ञानात् तेषु विरक्तिर्जायते, तथा च तदर्थानि कर्माणि किंवा क्रमशः प्रवृत्त्यात्मककर्म्माणि परित्यजतः श्रुतिस्मृतिनिर्दिष्टानि निष्कामकर्माणि किंवा निवृत्त्यात्मकानि कर्माणि कुर्वत आत्मज्ञानार्थं यतमानस्याभ्यस्यतश्च मुमुक्षोर्निवर्तकधर्मोपचयादात्मज्ञाने परिपक्वे आत्यन्तिकशरीरवियोगो जायते' इति—

**तत्त्वतो ज्ञातेषु बाह्याध्यात्मिकेषु विषयेषु दोषदर्शनाद्विरक्तस्य समीहानिवृत्तावात्मज्ञस्य तदर्थानि कर्माण्यकुर्व्वतस्तत्परित्यागसाधनानि च श्रुतिस्मृत्युदितान्यसङ्कल्पितफलानि उपाददानस्य आत्मज्ञानम् अभ्यस्यतः प्रकृष्टनिवर्तकधर्मोपचये सति परिपक्वात्मज्ञानस्य आत्यन्तिकशरीरवियोगस्य भावात्** (भट्टः, ख्रै.१९९७, पृ.१९)।

प्रसङ्गेऽत्र जिज्ञासेयं समुदेति यत्तथा धर्मः किंवा निवृत्त्यात्मको धर्मः कस्यचनानुग्रहं वाञ्छति न वेति ? अत्राञ्जसा समुत्थितामेनां जिज्ञासां समादधानो भट्टश्रीधरोऽभिधत्ते यद् 'यदा यावदीश्वरानुग्रहं न लभते तदा यावत् स च धर्मो न निःश्रेयसं कराति' इति— "धर्मोऽपि तावन्न निःश्रेयसं करोति यावदीश्वरेच्छया नानुगृह्यते ...। ... ईश्वरेच्छाविशेषेण कार्यारम्भाभिमुखीकृताद्धर्मादेव निःश्रेयसं भवतीति वाक्ययोजना" (भट्टः, ख्रै.१९९७, पृ.१९)।

तत्र 'तच्चेश्वरचोदना...' इत्यादिवाक्यगत–'तच्च'–इत्येतद्घटक'च'कारेण द्रव्यादिसाधर्म्यज्ञानयुतस्य धर्मस्य निःश्रेयसकारणत्वं स्पष्टीकरोति प्रशस्तदेव इत्यपि स्फुटं ज्ञापयति कन्दलीकारः— "तच्चेति चकारो द्रव्यादिसाधर्म्यज्ञानेन सह धर्म्मस्य निःश्रेयसहेतुत्वं समुच्चिनोति" (भट्टः, ख्रै.१९९७, पृ.१९)। एतावता कन्दलीकारो ज्ञानकर्मसमुच्चयवादी विद्यत इति सम्पुष्यति। मोक्षव्याख्यानप्रकरणे "किं ज्ञानमात्रान्मुक्तिः ? उत ज्ञानकर्मसमुच्चयात् ?" (भट्टः, ख्रै.१९९७, पृ.६८३) इति प्रश्नं समुपस्थाप्य "ज्ञानकर्मसमुच्चयादिति वदामः" (भट्टः, ख्रै.१९९७, पृ.६८३) इत्येतत् समादधानो न्यायकन्दलीकारः श्रीधरः स्वस्य ज्ञानकर्मसमुच्चयवादित्वं पोषयति। किञ्च वेदनिर्दिष्टकर्मतः सत्त्वसंशुद्धिर्जायतेऽथ च तत्त्वज्ञानेनाऽऽत्मविनिश्चयः, अपि च द्वयोरभ्यासेन निःश्रेयसं सम्पद्यत इत्यपि दृढं पुरःस्थापयति कन्दलीकारः—

**कर्मणा सत्त्वसंशुद्धिर्ज्ञानेनाऽऽत्मविनिश्चयः।**

**भवेद् विमुक्तिरभ्यासात् तयोरेव समुच्चयात्॥** (भट्टः, ख्रै.१९९७, पृ.६८९)

किं बहुना ! ज्ञाने किंवा तत्त्वज्ञाने सम्पन्नेऽपि यावदेतच्छरीरं तावन्नित्यनैमित्तिकादीनि कर्माण्यनुष्ठेयान्येव भवन्ति, अननुष्ठितेषु तेषु तान्येव कर्माण्यननुतिष्ठन्तं तत्त्वज्ञमपि जीवं बध्नन्तीत्युद्घोषयता श्रीधराचार्येण कर्मणोऽनितरसाधारणवैशिष्ट्यञ्च प्रत्यपादि—

**यानि काम्यानि कर्माणि प्रतिषिद्धानि यान्यपि।**

**तानि बध्नन्त्यकुर्वन्तं नित्यनैमित्तिकान्यपि॥** (भट्टः, ख्रै.१९९७, पृ.६८४)

तत्रापि तत्त्वज्ञाने सत्यपि विशेषतो नित्यनैमित्तिकानि कर्माण्यनुष्ठेयानीत्यधस्तनान्मीमांसकवचनात् स्पष्टीभवति—

**मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः।**

**नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया॥** (भट्टः, वै.२०३४, पृ.४७६)

एतत्सर्वं ज्ञापयितुकामैरध्वरमीमांसाविचक्षणैर्ज्ञानकर्मोभयपूतैराचार्यवर्यैरिदन्तावत् सम्यगुदघोषि—

**ननु निःश्रेयसं ज्ञानाद् बन्धहेतोर्न कर्मणः।**

**नैकस्मादपि तत् किन्तु ज्ञानकर्म्मसमुच्चयात्॥** (किशोरदास, ख्रै.१९९८, पृ.२१३ इत्यत्र उद्धृतम्)

किञ्चाधस्तनाद् योगवाशिष्ठगतवचनाच्च तत् पुष्यति—

**उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः।**

**तथा वै ज्ञानकर्मभ्यां नराणां मुक्तिरिष्यते॥**

**केवलात् कर्मणो ज्ञानान्न हि मोक्षोऽभिजायते।**

**किन्तूभाभ्यां भवेन्मोक्षः साधनं तूभयं विदुः ।।** (वाल्मीकिः, १।१।७,८)

निःशेषमेतत् कन्दलीकारेण सम्यगनुशीलितमासीत्। अतोऽमुनापि विदुषा स एव पन्था अवलम्बित इति तज्जृम्भितग्रन्थग्रन्थ्यवलोकनेनावगम्यते।

निष्कर्षे तावद् वैशेषिकाचार्येषु व्योमवतीकारकन्दलीकारावुभावपि ज्ञानकर्मसमुच्चयवादिनाविति विभावयामः। भेदः कुत्र ? इति चेद् व्योमशिवाचार्यो ज्ञानस्य प्रामुख्यं मन्यमानस्तदभिन्नसहयोगित्वेन धर्मं किंवा वैदिककर्म्म परिगणयति। श्रीधरभट्टश्च धर्मस्य किंवा वैदिककर्मणः प्रामुख्यं स्वीकुर्वाणस्तदभिन्नसहयोगित्वेन द्रव्यादितत्त्वज्ञानं पुरःस्थापयति।

किरणावलीकारस्तु ज्ञानस्यैव किंवा तत्त्वज्ञानस्यैव मुक्तिकारणत्वं दृढीकरोति— "तत्त्वज्ञानं हि विरोधितया समूलं मिथ्याज्ञानमुन्मूलयन्निःश्रेयसहेतुः" (उदयनः, ख्रै.१९८०, पृ.९९)।

तत्र प्रसङ्गे तथा तत्त्वज्ञानं कुतो भवति ? इति विचिकित्सायां 'प्रशस्तदेवस्तच्चेत्यादिकं वदति' इति स्वमतं प्रकटीकरोत्याचार्यः। तथा च व्याख्याति तत्रभवानुदयनाचार्यः— "ईश्वरस्य चोदना उपदेशो वेद इति यावत्" (उदयनः, ख्रै.१९८०, पृ.९९)। तथा वेदप्रतिपादिताद् धर्मादेव तत्त्वज्ञानं जायते। ततो मुक्तिः सम्पद्यत इति मतं दृढीकरोति वैशेषिकतत्त्वविद् विद्वत्प्रवरोदयनः। तत्रभवानग्रे आह— "तेनाभिव्यक्तात् प्रतिपादिताद् धर्म्मादेवेत्यर्थः" (उदयनः, ख्रै.१९८०, पृ.९९)। फलितोऽर्थश्चायम्– "शास्त्रेण पदार्थान् विविच्य श्रुतिस्मृतीतिहासपुराणोपदिष्टयोगविधिना दीर्घकालादरनैरन्तर्यसेवितान्निवृत्तिलक्षणाद् धर्म्मादेव तत्त्वज्ञानमुत्पद्यते, यतोऽपवृज्यते" (उदयनः, ख्रै.१९८०, पृ.९९)।

स्वकीयं वाक्यमेतद् व्याकुर्वन् किरणावलीकारः पुनरभिधत्ते— 'पदार्थचिन्तनमन्तराऽऽत्माऽनात्मविषयको विवेको नोत्पद्यते। तथा विवेकमन्तरोपदेशमात्रेणाश्रद्धापङ्को न निवर्तते। अश्रद्धापङ्कनिवर्तनेन विना न शङ्काशूकत्यागः। शङ्काशूकत्यागमन्तरा निवृत्त्यात्मको धर्मो न जायते। तेन विना जगत्कारणीभूतं भ्रमात्मकज्ञाननिवर्तकं प्रमात्मकं ज्ञानं न सम्पद्यते। प्रमात्मकं ज्ञानमन्तरा किंवाऽऽत्मविषयकं प्रमात्मकज्ञानमन्तरा न निःश्रेयसमधिगम्यते'—

**न ह्युपपत्त्या विना विवेकः, न च विवेकाद्विनोपदेशमात्रेणाश्रद्धामलक्षालनम्, न च तेन विना शङ्काशूकत्यागः, न च तमन्तरेण निवर्तको धर्मः, न च तेन विना दृढभूमिविभ्रमसमुन्मूलनसमर्थतत्त्वसाक्षात्कार इति** (उदयनः, ख्रै.१९८०, पृ.९९)।

एतावता निवर्तकधर्मजन्यं तत्त्वज्ञानम्, तज्जन्यं निःश्रेयसमिति स्पष्टीकरोति तत्रभवानाचार्यप्रवरोदयनः। सामान्यतोऽयमपि ज्ञानकर्मसमुच्चयवादीव प्रतीयते, वस्तुतस्त्वाचार्यो ज्ञानकर्मसमुच्चयवादं खण्डयति– "एतेन सत्त्वशुद्धिद्वारेण आरादुपकारकं कर्म सन्निपत्योपकारकञ्च तत्त्वज्ञानमिति मन्तव्यम्। न तु तुल्यकक्षतया तत्समुच्चयः" (उदयनः, ख्रै.१९८०, पृ.१०६)। तथापि वैशेषिकतत्त्वज्ञोऽयं ज्ञानपूतः परम्परया धर्मस्य किंवा वैदिककर्मणो मुक्तेः कारणत्वेन व्याख्याने तु नावशेषयति किञ्चन लेशमात्रमिति विवेकः।

## निष्कर्षः

यद्यपि पौरस्त्यचिन्तनन्तावन्निःश्रेयसपर्यवसायि, अथापि यथायथं तत्तद्दर्शनेषु निःश्रेयसस्वरूपभेदः कारणभेदोऽपि प्रतिपादितो दृष्टिपथे समायाति। निःश्रेयसपदेन सुखमवगम्यते तत्रापि निरतिशयसुखमेव निःश्रेयसपदवाच्यमिति तु नाविदितं विपश्चिदपश्चिमानाम्। निःश्रेयसञ्च कथं भवति ? तत्र किं कारणम् ? किंस्वरूपकञ्च तद् ? इत्यत्र नैकमतं लभ्यते ज्ञानकर्मोभयपूतानामपश्चिमानां विदुषाम्। वैशेषिकदर्शनप्रणेता महामुनिः कणव्रतस्तावद् धर्मविशेषप्रसूताद् द्रव्यादितत्त्वज्ञानान्मुक्तिरित्यभ्यधात्। तत्र पुनः कोऽयं धर्मविशेषप्रसूतपदघटको धर्मपदार्थः ? इत्यत्र महर्षिः कणभुग् 'यतोऽभ्युदयनिःश्रेयससिद्धिः स' इति कथयामास।

उपर्युक्तेनाभिधानेन तत्त्वज्ञानान्मुक्तिर्धर्माच्च मुक्तिरिति स्फुटीभवति। तथा च मुक्तेः कारणं धर्मविशेषप्रसूतद्रव्यादितत्त्वज्ञानं धर्मो वेति विचिकित्सा विरोधश्चाऽऽपन्नः। काणादसूत्रे तन्निराकरणासत्त्वेऽपि प्रशस्तदेवस्तु निःश्रेयसञ्च तावद् धर्मादेवेति स्पष्टीचकार। तदेवानुमोदयन् कन्दलीकारस्तत्रभवान् श्रीधरः 'धर्मोऽपि तावन्न निःश्रेयसं करोति यावदीश्वरेच्छया नानुगृह्यते' इति लिलेख। स च द्रव्यादितत्त्वज्ञानेन सह धर्मो निःश्रेयसहेतुरिति भाषमाणो ज्ञानकर्म्मसमुच्चयवादीति स्फुटं ज्ञायते।

व्योमशिवाचार्यस्य मते ज्ञानस्यैव मोक्षकारणत्वेऽपि तत्परिपाकार्थं धर्मो ह्यनितरसाधारणकारणम्। न वेदनिर्दिष्टात् कर्मणः ऋते किंवा निवृत्त्यात्मकं धर्ममन्तरा परिपक्वात्मज्ञानं जायते, न वा निःश्रेयसमधिगम्यत इति भाषमाणस्य व्योमशिवाचार्यस्य ज्ञानकर्म्मसमुच्चयवादित्वं किंवा कर्मज्ञानसमुच्चयवादित्वमञ्जसावगम्यते। एतज्ज्ञापनार्थमेव महर्षिरुलूको धर्मस्य निःश्रेयसकारणत्वं बभाष इति व्योमशिवोऽमन्यत। तत्रोभयोर्विदुषोः को भेदः ? इति चेद् भट्टश्रीधरः कर्मणः प्रामुख्यं तत्त्वज्ञानस्य सहकारित्वं प्रत्यपादयच्चेद् व्योमशिवस्तु तद्वैपरीत्येन तत्त्वज्ञानस्य प्रामुख्यं धर्मस्य सहकारित्वं व्याचक्षे। उदयनश्च ज्ञानस्यैवाहोस्विद् द्रव्यादितत्त्वज्ञानस्यैव निःश्रेयसकारणत्वं प्रतिपादयन् ताभ्यां स्ववैमत्यं प्रकटीचकार। तथा सत्यपि निवृत्त्यात्मकस्य धर्मस्य महत्त्वं तद्वैशिष्ट्यञ्च मध्ये मध्ये स्मरति स्मारयति चास्मान् वैशेषिकचिन्तनास्थावतस्तत्रभवानाचार्योदयनः। ननु तथा निवृत्त्यात्मकधर्मस्य महत्त्वं स्फुटीकुर्वाण उदयनोऽपि ज्ञानकर्म्मसमुच्चयवादी वा ? इति चेन्न, 'एतेन सत्त्वशुद्धिद्वारेण आरादुपकारकं कर्म सन्निपत्योपकारकञ्च तत्त्वज्ञानमिति मन्तव्यम्। न तु तुल्यकक्षतया तत्समुच्चयः' इति कथयता तत्रभवतोदयनेन निःश्रेयसाय ज्ञानकर्मसमुच्चयकारणत्वं दृढं निराकृतमिति तु निष्कृष्टिः।

## सन्दर्भग्रन्थसूची

अमरसिंहः (वै.२०७७), *अमरकोशः*, कुलचन्द्रगौतमकृतनेपालीभाषाटीकयुतः, द्वितीयं संस्करणम्, काठमाडौँ : नेपाल प्रज्ञा–प्रतिष्ठान।

उदयनाचार्यः (ख्रै.१९८०), *किरणावली*, सम्पादकः– गौरीनाथशास्त्री, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

कणादः (ख्रै.१९८८), *वैशेषिकदर्शनम्*, अविज्ञातकर्तृकप्राचीनव्याख्यया समलङ्कृतम्, श्रीधरत्रिपाठिना सम्पादितम्, दरभङ्गा : मिथिलाविद्यापीठम्।

... (ख्रै.२००४), *वैशेषिकसूत्रम्*, षड्दर्शनसूत्रसङ्ग्रहे सङ्गृहीतम्, सम्पा.जे.एल.गुप्तः, वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान।

किशोरदासः (ख्रै.१९९८), *भारतीय दर्शन और मुक्ति मीमांसा*, राजपुर : स्वामी रामतीर्थ मिशन।

गिरिः, काशिकानन्दः (ख्रै.२००१), *द्वादशदर्शनसङ्ग्रहः*, वाराणसी : श्री स्वामी काशिकानन्दजी ट्रस्ट।

गौतमः, (ख्रै.२००४), *न्यायसूत्रम्*, षड्दर्शनसूत्रसङ्ग्रहे सङ्गृहीतम्, सम्पादकः– जे.एल.गुप्तः, वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान।

जैमिनिः (ख्रै.२००४), *मीमांसासूत्रम्*, षड्दर्शनसूत्रसङ्ग्रहे सङ्गृहीतम्, सम्पादकः– जे.एल.गुप्तः, वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान।

झा, आनन्द (ख्रै.१९६५), *पदार्थशास्त्र*, लखनऊ : हिन्दी समिति सूचना विभाग।

पाणिनिः (ख्रै.२०१९), *अष्टाध्यायी,* पदच्छेदवृत्तिवार्त्तिकटिप्पणीसहिता, परिष्कर्ता श्रीगोपालशास्त्री, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

प्रशस्तपादः (ख्रै.१९९७), *प्रशस्तपादभाष्यम्*, श्रीधरभट्टकृतन्यायकन्दलीयुतम्, सम्पादको हिन्दीव्याख्याकारश्च– श्रीदुर्गानन्द झा, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

फणिभूषणतर्कवागीश (ख्रै.१९६८), *न्यायपरिचय*, अनुवादक– डा.किशोरनाथ झा, वाराणसी : चौखम्बा विद्याभवन।

भट्टः, कुमारिलः (वै.२०३४), *श्लोकवार्तिकम्*, श्रीमत्पार्थसारथिमिश्रविरचितया न्यायरत्नाकरव्याख्यया सनाथम्, सम्पादकः परिष्कारश्च स्वामी द्वारिकादासशास्त्री, वाराणसी : तारा पब्लिकेशन।

भट्टः, जयन्तः (ख्रै.१९८४), *न्यायमञ्जरी*, ग्रन्थिभङ्गव्याख्यया संवलिता, व्याख्याता– चक्रधरः, तृतीयो भागः, ९–१२ आह्निकयुतः, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

भट्टः, श्रीधरः (ख्रै.१९९७), *न्यायकन्दली* (प्रशस्तपादभाष्यव्याख्यानम्), सम्पादको हिन्दीव्याख्याकारश्च– श्रीदुर्गानन्द झा, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

मथुरानाथतर्कवागीशः (ख्रै.१९८१), *किरणावलीरहस्यम्*, सम्पादकः– गौरीनाथशास्त्री, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

मिश्रः, नारायणः (ख्रै.१९६८), *वैशेषिकदर्शन : एक अध्ययन*, वाराणसी : चौखम्बा विद्याभवन।

मिश्रः, शङ्करः (ख्रै.२०६४), *वैशेषिकसूत्रोपस्कारः*, ढुण्ढिराजशास्त्रिकृतया 'प्रकाशिका'हिन्दीव्याख्ययोपेतः, वाराणसी : चौखम्बा संस्कृत सीरिज आफिस।

लौगाक्षिभास्करः (ख्रै.२००३), *अर्थसङ्ग्रहः*, डा.दयाशङ्करशास्त्रिकृतार्थबोधिनी–व्याख्यायुतः, पुनर्मुद्रितसंस्करण, वाराणसी : चौखम्बा विद्याभवन।

वाल्मीकिः (वै.२००४), *योगवाशिष्ठः*, प्रथमो भागः, श्रीमदच्युतग्रन्थमालाविश्वनाथपुस्तकालयाध्यक्षेण साहित्याचार्यपण्डितश्रीश्रीकृष्णपन्तशास्त्रिणा विरचितेन भाषानुवादेन समलङ्कृतः, अनुवादकमहोदयेन तथा वेदान्ताचार्यपण्डितश्रीमूलशङ्करशास्त्रिणा सम्पादितः, काशी : श्रेष्ठिप्रवरश्रीगौरीशङ्करगोयनका।

व्यासः (वै.२०७५), *भागवतम्*, उनचासवाँ पुनर्मुद्रण, गोरखपुर : गीताप्रेस।

व्योमशिवाचार्यः(ख्रै.१९८३), *व्योमवती*, प्रथमो भागः, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

शङ्कराचार्यः ... ?, *साधनापञ्चकम्*, व्याख्याकारः— स्वामी सुबोधानन्दः, केन्द्रीय चिन्मय मिसन ट्रस्ट।

शर्मा, वासुदेवः (सम्पा.) (ख्रै.२००३), *बृहदारण्यकोपनिषद्*, ईशाद्यष्टोत्तरशतोपनिषदि सङ्गृहीता, दिल्ली : राष्ट्रियसंस्कृतसंस्थानम् ।

... (ख्रै.२००३), *ब्रह्मबिन्दूपनिषद्*, ईशाद्यष्टोत्तरशतोपनिषदि सङ्गृहीता, दिल्ली : राष्ट्रियसंस्कृतसंस्थानम्।